वेद-वेदाङ्ग-वेदोपाङ्ग-स्मृति-पुराण-धर्मशास्त्रनिबन्ध-ग्रन्थानां यथाशक्ति सम्यगध्ययनं कृत्वाऽस्माभिर्वेदाङ्गज्योतिषस्य कौण्डिन्न्यायनव्याख्यानं प्रस्तुतम्। अस्माभिर् लगधमुनिप्रोक्त-वेदाङ्गज्योतिषग्रन्थतात्पर्यार्थमादाय तत्र प्रतिपादितानां सिद्धान्तानां यथेदानीमपि श्रौत-स्मार्त-धर्मकृत्याऽपेक्षित-युग-वर्षा-ऽयनर्तु-मास-पक्ष-तिथि-निरूपणे प्रयोगः कर्तुं शक्यते तथा व्याख्यानं कृतमस्ति। एतादृशं व्याख्यानं शङ्करबालकृष्णदीक्षित-सुधाकरद्विवेदि-बालगङ्गाधरतिलक-शामशास्त्र्यादिषु केनाऽपि पूर्वमकृतं ज्ञेयम्। इदानीमपि सूर्यस्योदगयनारम्भस्य तिथौ नक्षत्रे च सम्यङ् निरीक्षणेन निर्धारिते लगधमुनिप्रोक्तकालगणना-पद्धत्यनुसारं युग-वर्षा-ऽयनर्तु-मास-पक्ष-तिथि-पर्व-नक्षत्रादीनां गणना श्रौतस्मार्तधर्मकृत्येषूपयोगाय कर्तुं शक्येति अस्माभिस्तत्र प्रतिपादितम्। आधुनिक-खगोलवित्-कृतान् वास्तविकस्य सूर्योदगयनस्य कालान्, सूर्यचन्द्रयुतिकालाँश् चाऽऽदायाऽपि लगधमुनिप्रोक्तज्योतिषग्रन्थतात्पर्यार्थभूतस्य कालगणना-सिद्धान्तस्य श्रौतस्मार्तधर्मकृत्येषूपयोगाय प्रयोगः कर्तुं शक्य इति चाऽस्माभिस्तस्मिन् व्याख्याने प्रतिपादितमस्ति। तदर्थं लगधमुनि-प्रणीतग्रन्थतात्पर्यं चाऽस्माभिस्तत्र स्पष्टीकृतं श्रुतिस्मृतिपुराण-वचनैर् दृढतया समर्थितं चाऽस्ति। लगधमुनिप्रोक्तो ग्रन्थ आदियुगस्यैव वर्षाऽयनर्तुमासपक्षतिथिपर्वनक्षत्राणां गणितं मुख्य-तया प्रतिपादयति, अन्येषां युगानां गणितं तु उदगयनारम्भतिथि-नक्षत्राणां सम्यङ् निरीक्षणं कृत्वा कार्यमिति च प्रतिपादयतीति चास्माभिः स्पष्टतया प्रतिपादितमस्ति। एतत् तत्त्वमबुद्ध्वाऽन्यैः कृतस्य लगधमुनिग्रन्थे दोषारोपणस्य निराकरणं चाऽस्माभिः कृतमस्ति। सोमाकरेणाऽपि लगधमुनिप्रोक्तकालगणनापद्धतेः सर्वेषु कालेषु सामान्यतया प्रयोक्तुं शक्यता सम्यक् स्पष्टीकृता नास्ति। सर्वेषां श्लोकानामर्थाश् च सोमाकरेण स्पष्टतया प्रतिपादिता न सन्ति। अस्माकं व्याख्याने तु लगधमुनिप्रोक्त-कालगणनापद्धतेः समुचिते परिष्कारे कृते तस्याः सामान्यतया सर्वेषु कालेषु प्रयोक्तुं शक्यता सम्यक् प्रतिपादिता अस्ति। वेदाङ्गज्योतिषस्य प्रायः सर्वेषां श्लोकानामर्था अपि अस्माभिः स्पष्टतया प्रतिपादिताः सन्ति। एवं च लगधमुनिप्रोक्तस्य वेदाङ्ग-ज्योतिषग्रन्थस्य संस्कृतभाषायां समुचितं श्रुतिस्मृतिपुराणादि-वचनपरिपुष्टं सोदाहरणं सम्पूर्णं स्पष्टं च कौण्डिन्न्यायनव्याख्यान-मैदम्प्राथम्येनाऽस्माभिः प्रस्तुतमवगन्तव्यम्। अन्यानि उच्चा-वचानि वैशिष्ट्यानि व्याख्याने एव सुधीभिर् द्रष्टव्यानि। तथापि कानि चन प्रमुखाणि वैशिष्ट्यानि सूत्ररूपेणाऽध उपस्थाप्यन्ते—

१. श्रौतस्मार्त-धर्मकृत्यकाल-निरूपणार्थं लगधमुनिप्रोक्त-वेदाङ्गज्योतिषसिद्धान्तस्य समुचितं परिष्कारं कृत्वा-ऽधुनाऽप्यनुसरणीयत्वस्य प्रदर्शनम्।

२. लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थतात्पर्यस्य श्रुति-स्मृति-पुराणवचनैः स्पष्टीकरणं समर्थनं च।

३. लगधमुनिप्रोक्त-वेदाङ्गज्योतिषग्रन्थसारांशस्य सर्वेषु कालेषु प्रयोज्यतायाः प्रदर्शनम्।

४. प्रायः सर्वेषां पद्यानां स्पष्टतयाऽर्थस्य प्रतिपादनम्।

५. श्रौत-स्मार्त-धर्मकृत्यार्थकायनर्तुमासादि-निरूपणाऽऽधारभूतस्य प्रकृतिसम्मतस्य वैदिकानां वर्षस्य शिशिरर्तावारम्भस्य समर्थकस्य सोमाकरभाष्यस्य दृढतया समर्थनम्।

६. चान्द्राणां प्रभवादीनां षष्टेः संवत्सराणामेव वैदिक-संवत्सरपरिवत्सरादिभिः सह समन्वयस्य प्रतिपादनम्, वराहमिहिरादिभिः प्रतिपादितस्य बार्हस्पत्यानां षष्टेः संवत्सराणां वैदिकसंवत्सर-परिवत्सरादिभिः सह संयोजनस्य खण्डनं च।

७. कलिवर्षसङ्ख्यामादाय संवत्सरपरिवत्सरादीनां चान्द्राणां प्रभवादीनां च ज्ञानस्योपायस्योहापोहपूर्वकं स्पष्टीकरणम्।

८. आदियुगशब्दस्य बार्हस्पत्य-सुधारकाद्युक्तमर्थं निराकृत्य सोमाकरोक्तस्याऽर्थस्य समर्थनम्।

९. वैदिक-नववर्षारम्भदिनस्य स्पष्टीकरणम्, माघफाल्गुनादीनां तपस्तपस्याद्यभिन्नत्वस्य, ऋतुबद्धत्वस्य, नक्षत्रबद्धत्वस्याऽभावस्य च प्रतिपादनम्।

१०. सप्तमे श्लोके उदगयनस्य मुख्यताया उदगयनारम्भनक्षत्रस्योपलक्षणतायाश् च प्रतिपादनेन लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थस्य वैदिककालगणनोपायप्रदर्शकतया सदोपयोज्यत्वस्य प्रतिपादनम्।

११. एकादशे श्लोके उत्तरार्धस्य पूर्वव्याख्यातृभिरव्याख्यातस्य परम्परागतं पाठमेवादाय सम्यग् व्याख्यानम्।

१२. पूर्वव्याख्यातृभिरन्यथा व्याख्यातस्य द्वादशस्य श्लोकस्य श्रुतिस्मृतिपुराणधर्मशास्त्रसम्मतस्याऽर्थस्य प्रतिपादनम्।

१३. आदियुगस्य सावनदिनानाम् १२४ पर्वान्तानां विस्तृताया व्याख्यासहितायाः सारण्या उपस्थापनम्।

१४. नेपालदेशे सुरक्षितानां शिलालेखानां ग्रन्थानामन्येषां च लेख्यानां चाऽपि साहाय्येन वेदाङ्गज्योतिषोक्ताया अधिमासव्यवस्थाया युक्तियुक्ताया व्यावहारिक्याश् च व्याख्याया उपस्थापनेनाऽन्यैरप्रकाशितस्य वस्तुगतस्य तथ्यस्य प्रकाशनम्, वेदाङ्गज्योतिषोक्ताधिमासपद्धतेः सर्वेषु कालेषूपयोज्यतायाः साधनं च।

१५. श्रौतस्मार्तधर्मकृत्याधिकारिणां द्विजातीनां नाक्षत्रनामकरणे लगधप्रोक्तव्यवस्थाया एवाऽनुसरणीयतायाः प्रतिपादनम्।

१६. हस्तलेखानां युक्तीनां च साहाय्येन मूलग्रन्थस्य कतिपयानां शुद्धतरपाठानां च समावेशनम् (द्रष्टव्याः श्लोकाः ११, १३, १४, १६, २६, २७, ३१, ३७, ३८, ४२)।

१७. लगधस्योल्लेखेन युतस्य त्रिचत्वारिंशस्य श्लोकस्य हस्तलिखितपुस्तकपाठसाहाय्येन च यजुर्वेदिनां वेदाङ्गज्योतिषग्रन्थे पठितत्वस्य साधनम्।

१८. यजुर्वेदिनां वेदाङ्गज्योतिषग्रन्थस्य हस्तलेखयोश् छायाप्रतिलिप्योरपि समावेशनम्।

१९. आदियुगस्य पञ्चानामेव वर्षाणां संवत्सरपञ्जीनां तिथिपञ्जीनां वाऽप्युपस्थापनम्।

२०. यजुर्वेदिनां वेदाङ्गज्योतिषग्रन्थस्य शब्दानामकाराद्यनुक्रमणिकायाश् च समावेशनम्।

२१. विस्तृतायाः वेदाङ्गज्योतिषसम्बद्धविषयाणां प्रतिपादिकायाः संस्कृतभूमिकाया योजनम्।

२२. लगधमुनिप्रोक्तवेदाङ्गज्योतिषप्रतिकूलांशे आर्यभटीयब्राह्मस्फुटसिद्धान्त-सूर्यसिद्धान्तादीनां श्रौतस्मार्तधर्मकृत्यकालनिर्णयेऽप्रमाणत्वस्य स्पष्टीकरणम्। इति।

(फ) श्रौतस्मार्तधर्मकृत्यायावलम्बनीया प्रस्तुते वैदिकतिथिपत्रे आश्रिता वैदिककालगणनाव्यवस्था

अत्र लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थानुसारं श्रौत-स्मार्तधर्मकृत्यायाऽवलम्बनीयाया वैदिककालगणनाव्यवस्थायाः सारांशः सङ्क्षेपेणोपस्थाप्यते।

वेद-मन्त्रसंहिता-ब्राह्मण-श्रौतसूत्र-गृह्यसूत्रेषु समुल्लिखितानाम्, श्रौतयज्ञविशेषस्वरूपज्ञानायाऽऽवश्यकानाम् (द्र.- लौगाक्षिस्मृतौ, स्मृतिसन्दर्भे षष्ठे भागे, पृ.३७७), मार्कण्डेयस्मृतौ (स्मृतिसन्दर्भे षष्ठे भागे, पृ.१३४) विष्णुधर्मोत्तरपुराणे (३।१२०।२, ३।१५३।१-९, ३।३१७।२,३), हेमाद्रेर् दानखण्डे (पृ.८९०), कालमाधवे संवत्सरनिर्णयप्रकरणे (पृ.३५) च निर्दिष्टस्य तस्मिंस्तस्मिन् वत्सरविशेषे कार्यस्य कृत्यविशेषस्य कृते परमावश्यकानां च संवत्सर-परिवत्सरादीनां पञ्चानां वैदिकानां वत्सराणाम्, पञ्चवर्षात्मकस्य वैदिकस्य युगस्य च प्रतिपादनेन रहिताः मगब्राह्मणत्वाद् मुख्यवैदिकपरम्पराबाह्यत्वेन सम्भावितानाम् आर्यभट-वराहमिहिरब्रह्मगुप्त-नव्यसूर्यसिद्धान्तकारादीनाम् आर्यभटीय–बृहत्संहिता–ब्राह्मस्फुटसिद्धान्त–नव्यसूर्यसिद्धान्तादयो ज्योतिषग्रन्थाः, तदनुयायिनां लल्ल-श्रीपति-भास्कर-कमलाकरादीनां ज्योतिषग्रन्थाश्च वैदिकैर् द्विजवरैर् नित्यपञ्चमहायज्ञान्तर्गते ब्रह्मयज्ञेऽपि पठ्यमानेन **"पञ्चसंवत्सरमयम्"** इत्यादिकेन लगधमुनिप्रोक्तमूलवेदाङ्गज्योतिषग्रन्थेन विरुद्धत्वाद् अर्वाक्कालिकत्वाच्चाऽनादिपरम्परासिद्धश्रौत-स्मार्त-धर्मकृत्यकालानां वत्सराऽयनर्तुमासाऽधिमासपक्ष-

तिथीनां निर्णये प्रमाणत्वं नैव भजन्ते इति **"या वेदबाह्याः स्मृतयः"** (१२।९५,९६) इत्यादिना प्रतिपादिताद् मनुस्मृतिसिद्धान्तादवगम्यते। आर्यभटीयादिग्रन्थाः श्रौतधर्मकृत्यानपेक्षित-मेषादिराशि-भौमादिग्रहचार-सूर्यचन्द्रग्रहणादिविचारे तु मूलवेदाङ्गज्योतिष-ग्रन्थाऽविरोधेन उपयोक्तव्या अपि स्युः। तस्मात् श्रौत-स्मार्त-धर्मकृत्यार्थं कालव्यवस्थाऽधोवर्णितरूपा स्वीकार्या—

(१) वर्षारम्भः

सर्वप्रथमं वैदिक-नववत्सरारम्भदिनं निर्णेयम्। तच्च शङ्कुच्छायादिवेद्यस्य दृक्सिद्धस्य सौरस्योत्तरायणस्याऽऽरम्भस्य दिनात् (सायनमकरसङ्क्रान्तिदिनात्) प्रायेण पूर्वम्, अधिमास-युते वर्षे तु कदाचित् परमपि आसन्नं शुक्लप्रतिपद्दिनं ज्ञेयम्। एतच्च लगधमुनेः याजुषवेदाङ्गज्योतिषस्य **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः"** (श्लो.५), **"उपजायेते मध्ये चाऽन्तेऽधिमासकौ"** (श्लो.३७) इत्यादिभ्यो वचनेभ्य एवार्थात् सिद्धतया ज्ञातं भवति। एतदेव **"माघमासे धनिष्ठाभिरुत्तरेणैति भानुमान्। अर्धाश्लेषस्य श्रावणस्य दक्षिणेनोपनिवर्तते"** (२६।२९) इति बौधायनश्रौत-सूत्रवचनस्याऽप्यनुकूलं वर्तते।

(२) वर्षनिर्णयः

उक्तविधायां शुक्लप्रतिपदि प्रवृत्तो वैदिकवत्सरः संवत्सर-परिवत्सरादिषु पञ्चसु वत्सरेषु कतमो वत्सर इति च विष्णुधर्मोत्तरपुराणस्य **"पञ्चभक्ते तु यच्छेषम्"** (१।८२।५३) इत्यादिकस्य वचनस्य, वराहमिहिरकृत-पञ्चसिद्धान्तिकायाः **"द्व्यूनं शकेन्द्रकालम्"** इत्यादिकस्य वचनस्य च समन्वयेन निर्णेयम्। तदनुसारं चेदानीं वर्तमानः एतस्य (२०१६ क्रैस्तवर्षस्य) नवम्बरमासस्य त्रिंशे दिवसे स्थितायाः शुक्लप्रतिपदः प्रभृति प्रवृत्तो वैदिको वत्सरः वैदिकपञ्चाब्दकयुगद्वादशकचक्रस्य नवमस्य सौम्यस्य युगस्य द्वितीयः परिवत्सराख्यो वत्सरोऽस्तीति ज्ञेयम्। एतस्या एव प्रतिपदः कलियुगाब्दानाम् ५०८२ तमोऽब्दश्च प्रवृत्त इति च बोध्यम्।

उक्तप्रकारेण निर्णीतो वैदिको वत्सरो मुख्यतया चान्द्रोऽस्तीति वेदे (मा.वा.शु.य.वे. ७।३०,२२।३१, तै.कृ.य.वे.सं. १।४।१४।१, ६।५।३।४) त्रयोदशानां मासानामुल्लेखाद् ज्ञायते। कालमाधवे संवत्सरनिर्णयप्रकरणे **"अथ चान्द्रस्याऽवान्तरभेदा उच्यन्ते"** इत्युक्त्वा संवत्सर-परिवत्सरादीनां पञ्चानां वैदिकवत्सराणामुल्लिखितत्वात्, कालमाधवे (उपोद्घाते, श्लो.१३) कोषकल्पतरौ च (पृ.५१) **"चान्द्राणां प्रभवादीनाम्"** इत्यादिकस्य वचनस्य दर्शनाच्च तद् बोद्धुं शक्यते। एतेषां वैदिकानां पञ्चानां वर्षाणां द्वादशभिश् चक्रैर् वैष्णवयुगादिनामकैश् चान्द्राः प्रभवादयः षष्टिः संवत्सरा भवन्तीति च हेमाद्रिकृतश्राद्धकल्पविवरणात् (पृ.११५२-११५३) स्फुटतयाऽवगम्यते। प्रभवादयश्चान्द्राः षष्टिः संवत्सरा निर्णयसिन्धौ धर्मसिन्धौ च प्रतिपादिता एव सन्ति। एतर्हि पञ्चाङ्गपत्रकेषु लिख्यमाना वत्सरास्तु बार्हस्पत्याः सन्ति, न चान्द्राः। चान्द्र-बार्हस्पत्य-वत्सराणां समाननामकत्वेऽपि गणिते प्रारम्भे च स्पष्टो भेदोऽस्ति। संवत्सर-परिवत्सरादीनि वैदिकवत्सरनामानि चान्द्रप्रभवादिषु समन्वितानि भवन्ति, न बार्हस्पत्यप्रभवादिष्विति सम्यग् बोद्धव्यम्, वराहमिहिरादिप्रचारिते भ्रमे नैव पतितव्यम्। एतर्हि वस्तुतो साधारणनामको बार्हस्पत्यो वत्सरोऽस्ति; चान्द्रो वत्सरस्तु उक्तायाः शुक्लप्रतिपदः प्रभृति कीलकनामकः प्रवृत्तोऽस्ति। श्रौत-स्मार्त-कर्मादौ सङ्कल्पे चान्द्रा एव वत्सराः स्मर्तव्या न तु बार्हस्पत्या इति च निर्णयसिन्धौ अब्दनिर्णयप्रकरणे स्थितात् **"स्मरेत् सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा। नाऽन्यं यस्माद् वत्सरादौ प्रवृत्तिस् तस्य कीर्तिता।"** इत्यार्ष्टिषेणवचनात्, धर्मसिन्धोः प्रारम्भे स्थितात् **"कर्मादौ सङ्कल्पे चान्द्रवत्सर एव स्मर्तव्यो नाऽन्यः"** इति निर्विकल्पात् निर्णयाच्च ज्ञायते। मूलवैदिकपरम्परानुकूलोऽयमेव पक्षो वैदिकैः सदा सर्वत्र चाऽऽश्रयणीयो न तु **"जैवो वा नर्मदोत्तरे"** इत्युक्तः क्वाचित्क आनुकल्पिकः पक्षः, **"प्रथमत्यागे मानाभावात्"** इति न्यायात्। तस्माद् धर्मकृत्यार्थ-पञ्चाङ्गपत्रकेषु प्रथमकल्पतया चान्द्राणामेव संवत्सराणामुल्लेखस्य व्यवस्था वैदिकैर् विद्वद्भिः कार्या। अस्मिन् **वैदिकतिथिपत्रे** तथैव कृतमस्ति।

(३) सौरचान्द्रायनव्यवस्था

अर्वाचीनाऽवैदिकज्योतिषग्रन्थप्रभावाभिभूततया यद्यपि कालमाधवकारेण अयननिरूपणप्रकरणे **"के चित्तु चान्द्रमानेनाऽयनद्वयमभ्युपगच्छन्ति"** इति चान्द्रमयनमुपेक्षणीयतयोक्तम्, तथापि पुराणादिषु च **"त्रिभिर् ऋतुभिरयनम्"** इति चान्द्रैस् त्रिभिर् ऋतुभिरयनस्य निष्पत्तेः प्रतिपादितत्वाद् वैदिकानामृतूनां च चान्द्रत्वात्, सुश्रुतसंहितायामपि **"चन्द्रादित्ययोः कालविभागकरत्वाद् अयने द्वे भवतः"** (१।६।७) इति चन्द्रस्याऽपि अयनविभागहेतुत्वेनो-

ल्लिखितत्वाच् च श्रौतस्मार्तधर्मकृत्येषु अयनमपि सूर्यायन-सापेक्षमपि चान्द्रर्तुत्रयात्मकं चान्द्रमेव ग्राह्यमित्यवगम्यते। तत्र चान्द्रमुदगयनमपि उक्तविधशुक्लप्रतिपदात एव प्रवर्तते। अत एव वैदिकेषु धर्मकृत्यार्थकपञ्चाङ्गपत्रकेषु मुख्यतया तादृशमेव चान्द्रमयनं लेख्यम्।

(४) ऋतूनां चान्द्रत्वम्

वेदोक्ता ऋतवश्चान्द्रा एवेति वेदोक्तमधुमाधवादिमासानां चान्द्रत्वाद्, **"मधुश्च माधवश्च वासन्तिकावृतू"** इत्यादिकाद् वेद-वचनाच् चैव स्पष्टं भवति। एवं च चान्द्रः शिशिर ऋतुरपि उक्त-विधशुक्लप्रतिपदात एव प्रवर्तते। ततो यथायथं क्रमेण वसन्तादयः प्रवर्तन्ते। एवं च सति **"श्रौतस्मार्तक्रियाः सर्वाः कुर्याच् चान्द्र-मसर्तुषु। तदभावे तु सौरर्तुष्विति ज्योतिर्विदां मतम्"** इति निर्णय-सिन्ध्वादिधृतवचनाच्च अपरिहार्यं बलवन् निमित्तं विना प्रथम-कल्पं त्यक्त्वाऽनुकल्पं प्रत्यनुधावने **"प्रभुः प्रथमकल्पस्य यो-ऽनुकल्पेन वर्तते"** (मनुस्मृतौ ११।३०) इत्यादिकाद् मन्वादिवचनाद् ज्ञायमानाद् धर्मकृत्यफललोपस्य प्रसङ्गात् श्रौतस्मार्तक्रियासु प्रथमकल्पतया चान्द्र एव ऋतुर् ग्राह्यः, न तु वेदाङ्गज्योतिष-निन्दकब्रह्मगुप्तानुसरणपरभास्करादीनां **"वर्षायनर्तुयुगपूर्वकमत्र सौरात्"** इत्यादिकैर् वचनैर् वञ्चितैर् वैदिकैः सौर ऋतुः स्वीकर्तव्यः। तस्मात् श्रौतस्मार्त-धर्मकृत्यार्थकपञ्चाङ्गपत्रकेषु मुख्यतया चान्द्र एव ऋतुर् लेख्यः। अस्मिन् **वैदिकतिथिपत्रे** तथैव कृतम्।

नवीनसूर्यसिद्धान्तस्य **"भानोर् मकरसङ्क्रान्तेः"** इत्यादिना (मानाध्याये श्लो.९-१०) वचनेन प्रतिपादिता मेषमासादयः शुद्धाः सौरा मासास्तु मुख्ये वैदिकवाङ्मये मेषादिराशीनामुल्लेखस्यैवा-ऽभावात् सर्वथा अवैदिका ज्ञेयाः। वेदोक्ता मधुमाधवादयो मासास्तु चान्द्रा एवेति वेदे मधुमाधवादिभिः सहैव अंहसस्पतेः संसर्पस्य वाऽपि त्रयोदशस्य मासस्योल्लेखात् (मा.वा.शु.य.वे.म.सं. ७।३०, २२।३१, तै.कृ.य.वे.सं.१।४।१४।१) स्फुटतया बुध्यते। लगधमुनि-प्रोक्तवेदाङ्गज्योतिषग्रन्थस्य **"माघशुक्लप्रपन्नस्य पौषकृष्ण-समापिनः"** इति वचनाच् च वैदिकाश्चान्द्रा मासाः अमान्ताः (शुक्लादयः कृष्णान्ताः) सन्तीति स्पष्टतया ज्ञायते। चैत्रशुक्ल-प्रतिपदि वत्सरारम्भस्य प्रसिद्धिः अधिमासस्य शुक्लादित्वस्य स्थितिश्च वैदिकचान्द्रमासानां शुक्लादिकृष्णान्तत्वं सूचयत एव। एवं च चान्द्रस् तपोमासः (माघः) उक्तविधशुक्लप्रतिपदात एव प्रवर्तते। ततो यथायथं तपस्यादयः (फाल्गुनादयः) मासाः क्रमेण प्रवर्तन्ते। तस्माद् धर्मकृत्यार्थकपञ्चाङ्गपत्रकेषु सार्वत्रिकास् त्रैविद्य-सम्मता अमान्ताश् चान्द्रास् तपोमासादयो (माघमासादयो) मासा एव प्राधान्येन लेख्याः, न तु क्वाचित्काः पूर्णान्ताश्चैत्रादयो मासाः। तत्र पूर्णान्ता मासास्तु गौणत्वेनैवोल्लेखितुमुचिता भवन्ति। अस्मिन् **वैदिकतिथिपत्रे** तथैव कृतम्। प्रथमपङ्क्तौ स्थूलाक्षरैर् वैदिका अमान्ता मासा लिखिताः द्वितीयपङ्क्तौ गौणा मासा लिखिताः।

(५) अधिकमासः

अयनविषुवविज्ञेयशीतोष्णवर्षहेतु-वास्तविकसौरर्तुभिः सह चान्द्राणामृतूनां दूरविप्रकर्षं परिहृत्य सामञ्जस्यस्य स्थापने च मूलवेदाङ्गज्योतिषोक्तायाः कौटलीयार्थशास्त्रानुसृताया हिमवत्-खण्डेतिहासप्रसिद्धायाश् चाऽयनान्ताधिमासव्यवस्थाया एव समर्थतरत्वाच्च वेदाङ्गज्योतिषानुसारी अयनान्तमात्रवर्ती अधिमास एव श्रौतस्मार्तकृत्यार्थकपञ्चाङ्गपत्रकेषु प्रधानतयाऽवलम्बनीयः। अन्योऽधिमासस्तु तत्र गौणतयैव सूचयितुमुचितः। अस्मिन् **वैदिकतिथिपत्रे** तथैव कृतम्।

(६) अहोरात्रात्मिकाः तिथयः

ब्रह्मगुप्तादिप्रचारितः स्फुटतिथिपक्षोऽवैदिकोऽस्तीति सम्यग् बुद्ध्वा वेदाङ्गयाजुषज्योतिषाऽऽथर्वणज्योतिषाऽनुसारिणो वेदोल्लि-खिताऽनुमति-राका-सिनीवाली-कुहू-व्यवस्थानुकूलाश् चाखण्ड-तिथयः श्रौतस्मार्तधर्मार्थपञ्चाङ्गपत्रकेषु मुख्यतया लेख्याः। तत्र पूर्णमासेष्टिदिनं दर्शेष्टिदिनं च तिथि-मास-व्यवस्थास्पष्टत्वार्थ-मप्यवश्यं लेख्यम्।

यवन-शक-हूण-कुषाणादीनामनुकूलैर् मगब्राह्मणैः तदनु-सारिभिरन्यैश्च कृतानां ज्योतिषग्रन्थानां प्रभावेणाऽभिभवाल् लगध-मुनिप्रोक्तवेदाङ्गज्योतिषोक्तमुख्यवैदिककालगणनाव्यवस्थामुपेक्ष्य वेदवेदाङ्गवाङ्मयमनादृत्य धर्मकामैर् द्विजवरैर् नास्तिकत्वं नैवा-ऽनुमोदनीयम्।

५०६७तमस्य कलियुगाब्दस्य तपःशुक्लप्रतिपदि (२०५८।८।३०वै.=२००१-१२-१५क्रै. इत्यङ्कनीये दिने) प्रकाशिता विद्वज्जनेषु प्रचारिता चेयं व्यवस्थाऽत्र समावेशिता बोध्या।

(ञ) उपसंहारः

उक्तविधायां वस्तुस्थितौ सत्यां च वेदानां वेदाङ्गानां च प्रामाण्यं रक्षितुकामैः शिष्टैर् द्विजोत्तमैरस्माकं प्रयासे विचारः कर्तव्यः। वेदाङ्गानां प्रामाण्यस्य रक्षणं विना वेदानां प्रामाण्यस्य रक्षणं दुश्शकमिति वैदिकशिरोमणिभूत आचार्यः कुमारिलभट्ट आह स्म। तथाहि—

परत्राऽविनयं कुर्वन् पितृभ्यां वार्यते सुतः।
तयोरेवाऽविनीतस्य को भवेद् विनिवारकः।।
तथा बहिरसम्बद्धं वदन् वेदेन वार्यते।
साऽङ्गेन तं पुनर् निघ्नन् केनाऽन्येन निवार्यते।।
क्रुद्धो यो नाम यं हन्ति स तस्याऽङ्गानि कृन्तति।
कृत्ताङ्गस्य ततस् तस्य विनाशः कियता भवेत्॥
तेन त्रयीं द्विषन् पूर्वं वेदाङ्गान्येव लुम्पति।
ततस् तेनैव मार्गेण मूलान्यन्यस्य कृन्तति॥ इति।

—तन्त्रवार्तिके (१।३।२७, आनन्दाश्रमसंस्करणे, १९७०, पृ. २२४)।

वेदाङ्गज्योतिषप्रामाण्यदृढीकरणाय च वैदिकैः सार्थस्य वेदाङ्गज्योतिषग्रन्थस्याऽध्ययनाऽध्यापनपरम्परा पुनरुज्जीवनीया। वेद-धर्मशास्त्र-ज्योतिषाध्ययनाध्यापनप्रक्रियायां "पञ्चसंवत्सर-मयम्" इत्यादिकस्य वेदाङ्गज्योतिषग्रन्थस्याऽध्ययनमध्यापनं च प्रचारणीयम्। पञ्चाङ्गपत्रककारैरपि वैदिकसंवत्सराद्यारम्भदिनम्, वैदिकोदगयन-दक्षिणायनारम्भदिने, वैदिकशिशिरर्त्वादिकर्त्वारम्भ-दिनानि, वैदिकतपस्तपस्यादिमासारम्भदिनानि, वैदिकपूर्णमासेष्टि-दर्शेष्टिदिनानि, वैदिकाधिमासप्रारम्भदिनं च स्वस्वपञ्चाङ्गपत्रकेषु वेदाङ्गज्योतिषानुसारं समावेशनीयानि।

अस्माकं वेदाङ्गज्योतिषव्याख्यानस्य तदनुसारिण एतस्य वैदिकतिथिपत्रस्य च निर्मत्सरैः सद्भिर् वेद-वेदाङ्गोपाङ्ग-कुशलैः शास्त्ररसिकैर् वैदिक-सनातन-वर्णाश्रम-धर्मानुयायिभिर् विद्वद्भिः सम्यक् परीक्ष्याऽऽकलनं कार्यम्, अत्राऽस्माकं विवेचने गणिते वाऽपि काऽपि त्रुटिर् दृश्यते तर्हि परया कृपयाऽस्मदीया मतिः शास्त्रयुक्तिप्रदर्शनेन परिशोधनीया च।

अन्ते च वेद-धर्मशास्त्र-ज्योतिषविद्वांसः स्वसमीपस्थान् पञ्चाङ्गकारान् तदीयपञ्चाङ्गपत्रेषु वैदिकयुग-वर्षायनर्तु-वैदिक-मधु-माधवादिमास-पक्ष-तिथ्युल्लेखनं प्रारब्धुम् उद्बोधयन्त्विति प्राथ्र्यन्ते।

"आगमप्रवणश् चाऽहं नाऽपवाद्यः स्खलन्नपि।
न हि सद्वर्त्मना गच्छन् स्खलितेष्वप्यपोद्यते॥"—कुमारिलभट्टपादाः।

वेदवेदाङ्गोपाङ्गस्मृतिपुराणादिशास्त्रवशवँवदम्
स्वाद्ध्यायशालाकुटुम्बम्,
ब्रह्मपुरी, बुढानीलकण्ठनगरपालिका–६
काष्ठमण्डपजनपदः, नेपालदेशः।

☏ ००९७७ ९८४१९६८२६२, ९८४९०९१४६७
Email : svadhyaya@hotmail.com

भारतवर्षीय-नगर-समयान्तर-सारणी (-,+मिनट)

प्रस्तुत वैदिक-तिथपत्र की सूर्योदयादि-गणना नेपाल के काठमाण्डु नगर के समयानुसार की गई है। भारत के विभिन्न नगरों से काठमाण्डु नगर के समय का अन्तर मिनट में इस प्रकार है—

स्थाननाम	अन्तर	स्थाननाम	अन्तर
अमृतसर	–४२	बेङ्गलुरु	–३१
आगरा	–२७	बीकानेर	–४६
इन्दौर	–३६	भोपाल	–३१
उज्जैन	–३६	मुम्बई	–४९
कोलकाता	+१३	मैसुरु	–३३
गोरखपुर	–७	मुलतान	–५३
जगन्नाथपुरी	+२	लखनऊ	–१७
जयपुर	–३६	लाहोर	–४३
त्रिवेन्द्रम्	–३४	वाराणसी	–९
दार्जिलिङ	+१२	श्रीनगर काश्मीर	–४२
दिल्ली	–३२	शृङ्गेरी	–४०
द्वारका	–६५	हरिद्वार	–२८
नागपुर	–२५	हैदराबाद	–२७
पुणे	–४६		

आचार्य-शिवराजकौण्डिन्न्यायनपथिकृत्त्वे प्रारब्धम्

वैदिकतिथिपत्रम्

पञ्चदशं पत्रम् (१५)

व्यवस्थापकः
आमोदवर्धनः कौण्डिन्न्यायनः
शुक्लयजुर्वेदाचार्यः, विद्यावारिधिः, ९८४९-०९१४६७

रचयिता सम्पादकश्च
प्रमोदवर्धनः कौण्डिन्न्यायनः
धर्ममीमांसाचार्यः, एम्.ए., विद्यावारिधिः, ९८४१-९६८२६२

सहयोगी
सुमोदवर्धनः कौण्डिन्न्यायनः
ब्रह्ममीमांसाचार्यः (अद्वैतवेदान्ताचार्यः), विद्यावारिधिः, ९८४३-०३५३९७

स्वाद्ध्यायशाला, ब्रह्मपुरी, काष्ठमण्डपजनपदः, नेपालदेशः ,
वैद्युतसन्देशः svadhyaya2036@gmail.com

सुसङ्गमक-गणना-सहयोगी
रघुनाथः उपाध्यायः ढुङ्गेलः

प्रचारणसंयोजकाः
कृष्णराजः वाग्लेः, व्यासनगरपालिका, तनहुँ, ९८४६-२४५९२२
कृष्णप्रसादः दुवाडीः आत्रेयः, वैदिक प्रज्ञा-प्रतिष्ठान, रत्ननगर–१३
जयमङ्गला, चितवन, ९८४५-१६०२४२, ०५६-५६०९४०
केशवप्रसादः दाहालः, धरान, ९७४९-९२८१३३।

विषयानुक्रमणिका

१. वैदिकतिथिपत्रभूमिका

मन्त्रपादपदसन्धिविधिज्ञो धातुनामवचनप्रकृतिज्ञः । ईदृशो भवति यज्ञविधिज्ञः मासपक्षतिथिचन्द्रगतिज्ञः ॥—परिशिष्टवचनम्।

(क) पात्रो हेर्न भन्दा पैला जान्न पर्ने विषय

प्रस्तुत तिथिपत्रमा प्रत्येक पृष्ठका शिरमा पैलो पङ्क्तिमा **वैदिक वर्ष, अयन, ऋतु , मैना** र **पक्ष** ठुला अक्षरमा दिइएका छन् भने **अन्य मतका वर्ष, मैना इत्यादि** दोस्रो पङ्क्तिमा साना अक्षरमा दिइएका छन्। वैदिक **तिथि** र **करण** अगाडिका स्तम्भमा दिइएका छन्। **वार, गते** र **तारिख** अन्तका स्तम्भमा क्रमशः दिइएका छन्। **वैदिक चान्द्र संवत्सर** वर्षभर एउटै रहन्छ भने **बार्हस्पत्य संवत्सर** गणितानुसार बिचमा नै फेरिन्छ, तेसैले तेसै अनुसार इ संवत्सरहरुको उल्लेख गरिएको छ। पौराणिक चाडपर्व पनि वैदिक मास नमिले पनि **वैदिक तिथि** परेका दिन दिइएको छ। **विवाह-व्रतबन्धादिका दिन (साइत) वैदिकसिद्धान्तअनुसार गृह्यसूत्रका विधानका आधारमा दिइएका छन्।** प्रस्तुत पात्रो हेर्दा एस विषयमा विशेष ध्यान दिन आवश्यक छ। एसै भूमिकाको **"प्रस्तुत तिथिपत्रको परिचय"** भन्ने प्रकरणमा उल्लेख गरिएका वैदिक तिथिपत्रका विशेषताहरुमा पनि ध्यान दिन अनुरोध छ।

(ख) नेपालि भाषाको लेखनका विषयमा बुज्न पर्ने कुरा

एस वैदिक-तिथिपत्रको नेपालि भाषाको लेखन शासकले लादेको कथित नेपालि व्याकरणको अधीनमा छैन। यास्क, पाणिनि, कात्यायन, पतञ्जलि, वररुचि, भर्तृहरि इत्यादि भारतवर्षीय महान् भाषाशास्त्रि वैयाकरणहरुले अँगालेका शाश्वत व्याकरणसिद्धान्तको अनुसरण गर्ने स्वाद्ध्यायशालाकुटुम्बका 'नेपाली वर्णोच्चारणशिक्षा' (साझाप्रकाशन, २०३१), 'जिम्दो नेपालि भासा' (पैलो खण्ड, २०३०; दोस्स्रो खण्ड, २०३७) इत्यादि ग्रन्थहरुमा र **अन्य** लेखहरुमा प्रतिपादित भाषाव्याकरणसिद्धान्तको अनुकूल रूपमा मध्यममार्ग लिएर एस तिथिपत्रमा नेपालि भाषाको लेखन प्रयुक्त गरिएको छ। उक्त अन्य लेखहरुको विवरण **'वैदिक धर्म मूल रूपमा'** भन्ने ग्रन्थमा (द्वि.सं. २०६२, पृ.७९९–८००, तृ.सं. २०८०, पृ. ११८४–११८६) उपलब्ध छ।

(ग) पञ्चाङ्ग कि तिथिपत्र

धर्मकर्मका लागि हेरिने पात्रालाइ आजभोलि लोकमा पञ्चाङ्ग भन्ने गरिएको छ। किन्तु पञ्चाङ्ग भन्ने कुरा प्राचीन वा वैदिक हैन। तिथि, करण, नक्षत्र, योग र वार इ पाँच थोकलाइ पञ्चाङ्गमा लिएर पछिपछि लोकमा पञ्चाङ्ग भन्ने गरिएको हो। तिनमा **तिथि** र **नक्षत्र वेदमा पनि उल्लिखित मूल कुरा** हुन्। करण तिथिको नै आदा भाग भएकाले त्यो तिथिले नै गतार्थ हुञ्छ। **योग** अर्वाचीन कालको कुरा हो। **वार** भन्ने कुरा पनि मूल वैदिक वाङ्मयमा छैन। वार भन्ने कुरा अरबदेशतिरबाट भारतवर्षमा आएको हो भन्ने कुरा सबै इतिहासलेखकले मानेका छन्। वैदिकधर्ममा अनादि कालदेखि चलेका परम्पराका कुरा मात्र मान्य हुञ्छन्। तसर्थ पञ्चाङ्ग भन्ने कुरा वैदिक धर्ममा मान्य वा ग्राह्य हैन। तसर्थ एस प्रकाशनलाइ पञ्चाङ्ग नभनेर **तिथिपत्र** भनिएको हो। एसलाइ **संवत्सरपञ्जी** पनि भन्न सकिञ्छ।

(घ) वैदिक धर्मकर्मका लागि वैदिक कालगणनाज्ञानको आवश्यकता

स्नान-सन्ध्योपासनादि नित्यकर्म गर्दा र अरु नैमित्तिक, काम्य र निष्काम कर्म गर्दा पनि सङ्कल्प गर्ने र तेसमा संवत्सर, अयन, ऋतु, मास, पक्ष, तिथि, नक्षत्र इत्यादिको उल्लेख गर्ने शास्त्रीय विधान र परम्परा छ। **"वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्"**

(बौधायनगृह्यसूत्र २।५।६), **"शिशिरे वा सर्वान्"** (भारद्वाजगृह्यसूत्र १।१), **"उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात्"** (पारस्करगृ.१।४।५), **"उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयन-गोदान-विवाहाः"** (आश्वलायनगृ.१।४।१), **"तस्माद् ब्राह्मणो वसन्त आदधीत"** (मा.वा.शतपथब्राह्मण २।१।३।५), **"कृत्तिकास्वग्नी आदधीत"** (मा.वा.शतपथब्राह्मण २।१।२।१), **"वसन्तेवसन्ते ज्योतिषा यजेत", "वसन्ते ज्योतिष्टोमेन यजेत"** (आप.श्रौ.सू. १०।१।१६), **"तेन वसन्तेवसन्ते यजेत"** (सत्याषाढश्रौ.सू. ७।१।४) इत्यादि श्रौत-स्मार्त विधानहरु छन्। वैदिक द्विजातिले स्नान, सन्ध्योपासन इत्यादिका र जातकर्म, नामकरण, अन्नप्राशन, व्रतबन्ध, विवाह, श्राद्ध इत्यादिका सङ्कल्पहरुमा **"पञ्चसंवत्सरमयम्"** इत्यादि वेदाङ्गज्योतिष-अनुसारका पद्धतिले निश्चित हुने संवत्सर-अयन-ऋतु-मास-पक्ष-तिथिहरुको नै उल्लेख गर्न पर्छ र गृह्यसूत्रअनुसार गरिने व्रतबन्ध, विवाह, श्राद्ध इत्यादिका कालको तथा श्रौतसूत्रअनुसार गरिने अग्न्याधान, दर्श-पौर्णमास, चातुर्मास्य, निरूढपशुबन्ध, सोमयाग इत्यादिका कालको पनि तेसै पद्धतिले नै निर्णय गर्न पर्छ। वैदिक द्विजातिले अन्य विषयमा पनि उक्त कालगणनापद्धति नै अँगाल्न समुचित हुन्छ।

लगधमुनिले वेदअनुसार वेदाङ्गज्योतिषमा बताएका वैदिक संवत्सर, अयन, ऋतु, मास, अधिकमास इत्यादि अरु पात्रामा लेखिएका संवत्सर, अयन, ऋतु, मास, अधिकमास इत्यादिभन्दा फरक छन्। वेदाङ्गज्योतिषअनुसार र वास्तविक तथ्यअनुसार पनि दक्षिणायन लागिसक्ता पनि चल्तिका पात्रामा उत्तरायण नै मानिएको हुन्छ, उत्तरायण लागिसक्ता समेत दक्षिणायन नै मानिएको हुन्छ; ग्रीष्म ऋतु लागिसक्ता पनि वसन्त ऋतु नै मानिएको हुन्छ। लगधप्रोक्त वैदिक चान्द्र मैनाहरु अमान्त हुन् भने चल्तिका अरु पात्रामा लेखिएका चान्द्र मैनाहरु पूर्णिमान्त छन्। श्रौतस्मार्त धर्मकर्मका लागि अमान्त मास नै ग्राह्य हुन्। वैदिक चान्द्रमासमा र चल्तिका पात्राका चान्द्रमासमा धेरै नै फरक पर्नजाञ्छ। प्रायः शुक्लपक्षमा दुइ मास र कृष्णपक्षमा एक मास फरक पर्नजाञ्च। **तपोमास**को (वैदिक आर्तव माघमासको) शुक्लपक्ष लागिसक्ता पनि अरु पात्रामा कैले मार्गशीर्षशुक्लपक्ष भन्ने र कैले पौष-शुक्लपक्ष भन्ने पनि लेखिएको हुन्छ। वैदिक अधिकमास पनि अत्यन्तै फरक छन्। तसर्थ वैदिक श्रौत-स्मार्त धर्मकर्मका लागि वेदोक्त कालको निरूपण गर्न र सङ्कल्पमा कालको उल्लेख गर्न पनि मूल वैदिक कालगणनासिद्धान्तअनुसारका तिथिपत्रको आवश्यकता पर्छ।

वैदिक धर्मका र मोक्षका विषयमा उपनयनपूर्वक वैध रूपमा अध्ययन गरिने वेद-वेदाङ्गग्रन्थहरु नै मूल रूपमा प्रमाण मानिञ्छन्। **पञ्चसंवत्सरमयम्** इत्यादि वेदाङ्गज्योतिषग्रन्थ तेसरि पडिने परमप्रामाणिक वेदाङ्गग्रन्थ हो। वेद-वेदाङ्ग शास्त्रमा र तिनमा प्रतिपादित धर्ममा आस्था भएका विज्ञजनहरुले एस विषयमा राम्ररि ध्यान दिनु र कुनै विमति वा शङ्का भएमा खुला रूपमा लिखित छलफल गर्नु आवश्यक हुन आएको छ। **एस सम्बन्धमा सबै शङ्काहरुको समाधान गर्न र प्रश्नहरुको उत्तर दिन स्वाद्ध्यायशालाकुटुम्ब सदा तत्पर छ।** एस परिस्थितिमा वैदिक तिथिपत्रको (पात्राको) विशेष खाँचो परेको हो। तसर्थ दृक्सिद्ध पञ्चाङ्गको पनि सहायता लिएर वेदाङ्गज्योतिषमा बताइएको मूल वैदिक कालगणनासिद्धान्तअनुसार श्रौत-स्मार्त-धर्मकर्मका लागि संवत्सर-अयन-ऋतु-मास-अधिमासादिको निर्णय गरि प्रस्तुत तिथिपत्र निष्पन्न गरि जनसमक्ष राख्ने काम भएको छ। वर्तमान कालमा लोकले विशेष खोज्ने लोकमा चल्तिमा रहेका केइ विषय पनि अनुबन्धमा सङ्गृहीत गरिएका छन्।

(ङ) वैदिक कालगणनापद्धतिको सङ्क्षिप्त परिचय

कालगणनाको मूल वैदिक पद्धति ऐले लोकमा चल्तिमा रहेको आर्यभट-वराहमिहिर इत्यादिका पुर्खा इरानि मगब्राह्मणहरुले इरानतिरबाट ल्याएर फैलाएको पद्धतिभन्दा फरक छ। वैदिककालगणनापद्धतिको सङ्क्षिप्त वर्णन याँहाँ उपस्थापित गरिञ्छ। कालको सबैभन्दा सानो परिमाणलाइ **त्रुटि** भञ्छन्। दुइ त्रुटिको एक **लव,** दुइ लवको एक **निमेष,** पन्द्र निमेषको एक **इदानि** वा **काष्ठा,** पन्द्र इदानिको एक **एतर्हि,** पन्द्र एतर्हिको एक **क्षिप्र,** पन्द्र क्षिप्रको एक **मुहूर्त** (४८ मिनेट) हुञ्छ। एक मुहूर्तमा बिस **कला र कलाको दश भागको एक भाग** रहेका मानिञ्छन्। तेस्तै एक

मुहूर्तमा दुइ **दण्ड** (**नाडी, घटिका [घडि]**) मानिञ्छन्। एक घटिकालाइ साठि पलामा विभक्त गर्ने कुरा आधुनिक ज्योतिषिहरुमा प्रसिद्ध छ। तिस मुहूर्तको एक **अहोरात्र (दिनरात)** हुञ्छ। अहोरात्रको प्रारम्भ वैदिकपरम्परामा सूर्योदयबाट हुञ्छ। सामान्यतया पन्द्र अहोरात्रको एक **पक्ष** हुञ्छ। शुक्लप्रतिपदाबाट पैलो पक्षको र कृष्णप्रतिपदाबाट दोस्रो पक्षको प्रारम्भ हुञ्छ। दुइ पक्षहरुको एक **चान्द्र मास** (मैना) हुञ्छ। **अधिकमास** पर्दा चार पक्षको एक चान्द्र मास (चान्द्र मैना) मान्ने मत पनि देखिञ्छ। दुइ चान्द्र मासहरुको एक **चान्द्र ऋतु** हुञ्छ। मूल वैदिक-परम्परामा ऋतुको प्रारम्भ पनि शुक्लप्रतिपदाबाटै हुञ्छ। अधिकमासले गर्दा **सौर वर्षको** र **चान्द्र वर्षको** तालमेल मिल्ने हुँदा प्रमुख वार्षिक तिथिपर्वहरु सामान्यतया उइ सौर ऋतुमा पर्ने हुञ्छन्। एसबाट चान्द्र ऋतु कुनै वर्षमा सौर ऋतुका दृष्टिले २५–३० दिनसम्म पनि अगि सर्ने भए पनि त्योभन्दा धेरै अगि सर्दैन। तिन चान्द्र ऋतुहरुको एक **चान्द्र अयन** हुञ्छ। दुइ सौर-चान्द्र अयनहरुको एक **सौर-चान्द्र वर्ष** हुञ्छ। पाँच सौर-चान्द्र वर्षहरुको एक **सौर-चान्द्र युग** हुञ्छ। सामान्यतया एक चान्द्र युगमा सौर आर्तव वर्ष पनि पाँच नै हुञ्छन्। यो वैदिक मूल कालगणनापद्धति हो। एस पद्धतिको प्रयोग वेदाङ्गज्योतिष, पाणिनीय व्याकरणाष्टाध्यायी, सुश्रुतसंहिता, महाभारत, कौटलीय अर्थशास्त्र इत्यादि प्राचीन प्रामाणिक ग्रन्थमा पाँइञ्छ। उक्त प्रकारका पाँचवर्षे बार युगहरु मिलाएर **युगसङ्घ** हुञ्छ। तेस्ता युगसङ्घका आधारमा पनि अगि-अगि कालगणना गर्ने गरिएको पाँइञ्छ। आर्यभटले आँफ्नो वय (उमेर) बताउँदा तेस्तै युगसङ्घलाइ प्रयोगमा ल्याएको पाइञ्छ। एस युगसङ्घलाइ लिएर प्रभवादि षष्टि (साठि) चान्द्र संवत्सरहरु पनि मानिएका छन्। **बार्हस्पत्य** षष्टि संवत्सरको र **चान्द्र** षष्टिसंवत्सरको गणित फरक छ। बार्हस्पत्य संवत्सर संवत्सर-परिवत्सरादिसित टम्म मिल्दैनन्। तिनको आरम्भ सँधैं वैदिक संवत्सरादिसँग हुँदैन। चान्द्र संवत्सर वैदिक संवत्सर-परिवत्सरादिसित टम्म मिल्छन्। चान्द्र षष्टिसंवत्सर वैदिक पञ्चवर्षात्मक युगको नै आर्को रूप हो। श्रौत-स्मार्त धर्म-कर्मका सङ्कल्पमा चान्द्र संवत्सरको नै उल्लेख गर्न पर्ने वैदिक परम्पराको व्यवस्था धर्मसिन्धुका प्रारम्भमा नै पनि स्पष्ट रूपमा दिइएको छ।

स्मृति-पुराणहरुमा तेसै वैदिक कालगणनापद्धतिको विस्तार गरि **युग, चतुर्युगी, मन्वन्तर, कल्प, महाकल्प** इत्यादि कालहरुको वर्णन गरिएको छ। मूल आधार भने उक्त वैदिककालगणनापद्धतिलाइ नै बनाइएको देखिञ्छ। तथापि केइ भेद पनि हुन गएको पाँइञ्छ। प्रक्षेपका आशङ्काले घेरिएका कुनै एकाध पुराणमा चैत्रशुक्लप्रतिपदामा वर्षारम्भ बताइएको पाँइञ्छ। आकरग्रन्थको राम्रो अवलोकन-परीक्षण-विवेचन नगरि लेख्ने धारेश्वर-लक्ष्मीधर-जीमूतवाहन-चण्डेश्वर-हेमाद्रि-माधव-कमलाकरभट्टहरुले पनि कथित पुराणवचन देखाइ तेस्तो कुरा लेखेका छन्। **आर्यभटीय, ब्राह्मस्फुटसिद्धान्त, खण्डखाद्यक, भास्वती, सूर्यसिद्धान्त इत्यादि** अर्वाचीन सिद्धान्तज्योतिषग्रन्थमा पनि तेइ कुरा देखिञ्छ। किन्तु ति ग्रन्थमा पनि अयनारम्भ माघमा नै मानिने वा शुभकर्मका लागि उत्तरायण माघदेखि नै प्रवृत्त भएको मानिने कुरा देखिञ्छ। एसरि अयनारम्भ माघबाट र वर्षारम्भ चैत्रबाट मान्ने एस पद्धतिका गणनामा आन्तरिक सङ्गति नै गडबडिएको देखिञ्छ। एसबाट **दुइ अयनहरुको एक वर्ष हुञ्छ** भन्ने स्मृति-पुराणादि-प्रतिपादित परिभाषामा पनि असामञ्जस्य आउँछ। मानुष (मानिसको) उत्तरायणलाइ देवताको दिन मान्ने तथा मानुष दक्षिणायनलाइ देवताको रात मान्ने र तेसैका आधारमा मानुष वर्षलाइ देवताको अहोरात्र मानि दिव्य वर्षको गणना गर्ने, अनि दिव्य वर्षहरुकै आधारमा युग, चतर्युगी, मन्वन्तर, कल्प, महाकल्प इत्यादिको गणना गर्ने मनुस्मृति इत्यादि ग्रन्थमा प्रतिपादित कालगणनापद्धतिमा पनि उक्त असामञ्जस्यबाट गडबडि पैदा हुञ्छ।

एस्ता विषयमा भारतवर्षका अर्वाचीन कालका वेद-वेदाङ्ग-वेदोपाङ्ग-स्मृति-पुराणादिका विद्वान्हरुको ध्यान नजानु सारै शोचनीय कुरा देखिञ्छ। एस विषयमा स्वाद्ध्यायशालाकुटुम्बबाट धेरै काम भएको छ। २०४५ संवत्मा प्रकाशित **वैदिक धर्म मूल रूपमा** (प्रथम संस्करण) भन्ने ग्रन्थमा वेदाङ्गज्योतिषको विशेषतातिर पाठकहरुको ध्यान आकृष्ट गरिएको थियो (पृ.१५–१७)। २०५२ संवत्मा प्रकाशित **वैदिकमन्त्रसङ्ग्रहग्रन्थ**का परिशिष्टमा (पृ.१३७) वैदिक कालगणनापद्धतिको सारांश श्लोकहरुमा दिइएको थियो। २०५३।१।१ मितिका कान्तिपुर दैनिक पत्रिकामा

"नववर्षारम्भ : केही विचारणीय कुरा" भन्ने लेख प्रकाशित गराइ एस विषयको चर्चा चलाइएको थियो। तेसपछि एस विषयमा धेरै लेख-निबन्ध पुस्तक-पुस्तिकाहरु प्रकाशित गर्ने र प्रवचन, छलफल, प्रदर्शनी इत्यादि गर्ने गरि चर्चा चलाइँदै आइएको छ। ति लेखको सूची **"स्वाद्ध्यायशालाकुटुम्बको स्वधर्मसन्देश (८) : वैदिक धर्म-कर्मका निम्ति वैदिक कालगणनापद्धति नै अँगाल्न पर्छ"** भन्ने पुस्तिकाका अन्तमा दिइएको छ (द्र.– एसै वैदिक-तिथिपत्रको परिशिष्टभाग)। **वेदाङ्गज्योतिष**को विस्तृत भूमिकासहित संस्कृत कौण्डिन्न्यायन-व्याख्यान र हिन्दि व्याख्या वाराणसीका चौखम्बाविद्याभवनबाट २०६२ संवत्मा (२००५ क्रैस्ताब्दमा) प्रकाशित छ। एसै विषयको **भारतवर्षीय ज्योतिष के ज्वलन्त प्रश्न और वेदाङ्गज्योतिष** भन्ने हाम्रो ग्रन्थ पनि २०६५ संवत्मा (२००८ क्रै.) प्रकाशित छ।

(च) वेदाङ्गज्योतिष र वैदिक कालगणनासिद्धान्त

वेदाङ्गज्योतिषग्रन्थ— वेदाङ्गज्योतिष भन्ने ग्रन्थ वैदिकहरुमा प्रसिद्ध रहिआएको ग्रन्थ हो। यो ग्रन्थ वैदिकहरुबाट वैध नित्यस्वाध्यायाध्ययनमा पडिँदैआएको ग्रन्थ हो। एसको वेदसित घनिष्ठ सम्बन्ध छ। एसमा प्रतिपादित विषय वेद-स्मृति-पुराणहरुमा उल्लिखित छन्। एस ग्रन्थको प्राचीन कालदेखि अर्वाचीन कालसम्मका ग्रन्थकारहरुले उल्लेख गरेका छन्। **लौगाक्षिस्मृति**मा **'पञ्चसंवत्सरमयम्'** इत्यादि वेदाङ्गज्योतिषग्रन्थलाइ नित्य ब्रह्मयज्ञमा अध्ययन गर्न पर्ने, उपाकर्ममा र उत्सर्जनकर्ममा गर्न पर्ने स्वाध्यायप्रवचनमा प्रवचन गर्न पर्ने, **अलङ्घनीय** ग्रन्थमा गनिएको छ (स्मृतिसन्दर्भ, षष्ठ भाग, २०१३ वै., पृ.२७५-२७६)। **"पञ्चसंवत्सरमयम्"** इत्यादि वेदाङ्गज्योतिष-ग्रन्थ नित्य ब्रह्मयज्ञमा(स्वाध्यायाध्ययनमा) अध्ययन गर्न पर्ने कुरा **देवीभागवत**मा (११।२०।४-१०)र **शिवपुराण-कैलाससंहिता**मा (१२।८८-९२) पनि भनिएको छ। आह्निकसूत्रावलिमा पनि वेदाङ्ग-ज्योतिषको प्रतीक **"पञ्चसंवत्सरमयम्"** नै दिइएको छ। एस ग्रन्थको प्रामाणिकताका विषयमा **वेदाङ्गज्योतिषको कौण्डिन्न्यायनव्याख्यान**का (२०६२वै.) भूमिकामा प्रकाश पारिएको छ।

अतः सधैँ नै वैदिक ब्राह्मणहरुले र तदनुयायि सबै हिन्दुहरुले लगधमुनिप्रोक्त **"पञ्च-संवत्सरमयम्"** इत्यादि वेदाङ्गज्योतिषग्रन्थलाइ नै मूल ज्योतिषग्रन्थका रूपमा मान्यता दिन पर्ने कुरा स्पष्ट हुञ्छ।

वेदाङ्गज्योतिषको रचनाकाल— ज्योतिषशास्त्रका सिद्धान्तहरुका बीज वेदका मन्त्र-संहिताहरुमा र ब्राह्मणग्रन्थमा पनि पाइञ्छन्। वेदका छ अङ्गहरुको निर्देश माध्यन्दिनीय-वाज-सनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणमा **"अङ्गजिद्ब्राह्मणेषु"** एस शब्दद्वारा (११।४।३।२०) गरिएको छ। षड्विंशब्राह्मणमा (५।७।२) पनि वेदाङ्गहरुको उल्लेख पाइञ्छ। गोपथब्राह्मणमा **"षडङ्गविदस् तत् तथाऽधीमहे"** (१।१।२७) एस वाक्यमा वेदका छ अङ्गहरुको उल्लेख छ। मुण्डकोपनिषद्मा वेदाङ्गहरुको क्रमबद्ध उल्लेख छ (१।१।४–५)। वेदाङ्गज्योतिषमा अनादि वैदिक कालगणनापद्धतिको प्रतिपादन गरिएको हुञ्छ। एसै अनादि वैदिक परम्पराक्रममा वर्तमान कालमा उपलब्ध लगधमुनिप्रोक्त वेदाङ्गज्योतिषग्रन्थको रचना भएको हो। शङ्करबालकृष्ण-दीक्षितले **इ.पू. १४१० औँ वर्षमा धनिष्ठाको आरम्भमा उत्तरायणारम्भ थियो भन्ने सिद्ध हुनाले वेदाङ्गज्योतिषको एइ समय निश्चित हुञ्छ** भनेका छन् (भारतीय ज्योतिष [मराठि संस्करण १९५३ वै.], हिन्दिसंस्करण, २०३२ वै., अनुवादक शिवनाथ झारखण्डी, पृ.१२२)। एसको रचनाकाल सुधाकर द्विवेदिले वेदाङ्गज्योतिषव्याख्याको भूमिकामा **महाभारतभन्दा अगाडि हो** भनेका छन् (मेडिकल्हल्-मुद्रणालय, वाराणसी, १९६४ वै., भूमिका, पृ.१)। वेदाङ्गज्योतिषका आर्का व्याख्याता शामशास्त्रिले दीपिकानामक संस्कृतव्याख्याको प्रारम्भमा लगधमुनिप्रोक्त-वेदाङ्गज्योतिषग्रन्थको रचना **शकान्तसंवत्को प्रारम्भ हुनुभन्दा एक हजार वर्ष पहिले भएको हो** भनेका छन् (मैसुरु, १९३६ क्रै., पृ.१)।

लगधमुनिको देश— लगधमुनिको देश कश्मीर थियो भन्ने अनुमान शङ्करबालकृष्ण-दीक्षितले गरेका छन्। छोटेलाल-बार्हस्पत्यले लगधमुनिको देश बर्बरदेश मान्छन् भनी 'हिन्दुत्व'-नामक ग्रन्थमा रामदासगौडले भनेका छन्। वेदाङ्गज्योतिषमा (श्लो.८, श्लो.४०) प्रतिपादित दिनमानव्यवस्थाको (दिनमान न्यूनतम १२ मुहूर्त र अधिकतम १८ मुहूर्त हुञ्छ भन्ने कुराको)

आधार लिएर ति देशको सम्भावना गरिएको बुजिञ्छ। तर दिनमानका विषयमा 'गोनर्दीय' भनेर प्रसिद्ध पतञ्जलिमुनिले पनि वेदाङ्गज्योतिषमा भनेकै कुरा भनेकाले (पाणिनीयव्याकरणभाष्य २।१।२८) दिनमानको प्रतिपादनका आधारमा देशको निश्चय नहुने बुजिञ्छ। अतः लगधमुनि एसै देशका थिए भनेर निश्चित रूपमा भन्न कठिन छ।

स्वाद्ध्यायशालाकुटुम्बमा शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द र ज्योतिष इ छओटै वेदाङ्गले युक्त वेदको अध्ययन गर्ने क्रममा गरिएका लगधमुनिप्रोक्त मूल वेदाङ्गज्योतिष-ग्रन्थका, अन्य स्मृति-पुराणादिशास्त्रका र नेपालको इतिहासका अध्ययनबाट निस्केका वैदिक कालगणनासिद्धान्त-सम्बन्धि केइ निष्कर्ष तल प्रस्तुत छन्—

१. युगनिर्णय— वैदिक परम्परामा पाँचपाँच वर्षका युग मानिएका छन्। तिनलाइ १२-१२ युगहरुको समूहमा समूहीकृत गरेर ति समूहहरुलाइ **युगसङ्घ** भन्ने परम्परा पनि छ। ति १२ युग इ हुन्— **(१) वैष्णव, (२) बार्हस्पत्य, (३) ऐन्द्र, (४) आग्नेय, (५) त्वाष्ट्र, (६) आहिर्बुध्न्य, (७) पित्र्य, (८) वैश्वदेव, (९) सौम्य, (१०) ऐन्द्राग्न, (११) आश्विन** र **(१२) भाग्य।** इ युग-हरुको श्राद्धका सङ्कल्पमा उल्लेख गर्ने कुरा हेमाद्रिका चतुर्वर्गचिन्तामणिका परिशेषखण्डका श्राद्धकल्पमा (पृ. ११५२) पनि छ। चल्तिका पात्राले गतकलिवर्ष भन्ने गरेका महाभारतयुद्धाब्दका सङ्ख्यामा महाभारतयुद्धपछि ३६ वर्षमा कृष्णको स्वर्गारोहण भएपछि कलियुग लागेको मानिएकाले ३६ घटाइ आएको सङ्ख्यालाइ वर्तमान कलिवर्षसङ्ख्या मानि तेसैलाइ साठिले भाग लिइ शेषलाइ पाँचले भाग लिएर इ युगको निर्णय गर्न पर्छ। युगको आरम्भ तपःशुक्लप्रतिपदामा (वैदिक आर्तव माघशुक्लप्रतिपदामा) हुने र युगको समाप्ति सहस्यकृष्णमा (वैदिक आर्तव पौषकृष्णमा) हुने कुरा वेदाङ्गज्योतिषमा उल्लिखित छ (५ श्लो.)।

२. वर्षनिर्णय र संवत्सरनिर्णय— श्रौत र स्मार्त धर्मकृत्यका लागि युग-वर्ष-अयन-ऋतु-मासहरुको गणनाको प्रारम्भ सूर्यको दृक्सिद्ध उत्तरायणाऽऽरम्भभन्दा अगाडिको वा सँगैको वा ५–६ दिनसम्म परको नजिकैको शुक्ल-प्रतिपदाबाट हुञ्छ। सूर्यको उत्तरायणारम्भको दिन (अर्थात् पात्रामा लेखिएका सबैभन्दा थोरै दिनमान भएका दिनहरुका माजाको दिन) जुन शुक्लप्रतिपदा-देखि अमावास्यासम्मको चान्द्रमासका प्रारम्भका २४ दिनभित्र पर्छ त्यो चान्द्रमास वैदिक **तपोमास** वा **वैदिक आर्तव माघमास** हुञ्छ। पच्चिसौँ-छब्बिसौँ इत्यादि दिनमा त्यो दिन परे तेस्तो चान्द्रमास **वैदिक अधिकमास (मलमास)** हुञ्छ र तेस अधिकमासपछि आउने शुक्लप्रतिपदामा लाग्ने चान्द्र-मास वैदिक तपोमास वा वैदिक आर्तव माघमास हुञ्छ। सजिलोका लागि भन्न पर्दा चल्तिका पात्रामा **"मकरे सायनार्कः (सायनमकरे सूर्यः)"** भन्ने लेखिएका दिनमा अमान्त (अमावास्यामा पूर्ण हुने, शुक्लादि कृष्णान्त) चान्द्रमासको कृष्णनवमीसम्मको कुनै तिथि भए तेसै चान्द्रमासको शुक्लप्रतिपदामा वैदिक नववर्षको आरम्भ हुञ्छ, कृष्णदशमी वा तेसपछिको तिथि भए आउँदो अमावास्यामा पूर्ण हुने मास वैदिक अधिकमास मानिञ्छ र तेसपछिको शुक्लप्रतिपदामा वैदिक नववर्षको आरम्भ हुञ्छ भन्न सकिञ्छ। वैदिक युगका पाँच चान्द्र वर्षहरु **(१) संवत्सर, (२) परिवत्सर, (३) इदावत्सर, (४) इद्वत्सर** र **(५) वत्सर** हुन्। वैदिक वर्षारम्भदिनबाट कलिवर्ष पनि लाग्ने हो। चान्द्र संवत्सरहरु वैदिक पञ्चवर्षात्मकयुगसमूहमूलक हुन्। चान्द्र प्रभवादि संवत्सर ६० छन्। नामहरु उनै भएपनि चान्द्रसंवत्सरहरुको र बार्हस्पत्यसंवत्सरहरुको गणित फरक छ। वर्तमान कलिवर्षसङ्ख्यालाइ साठिले भाग गर्दा शेष १ भए चान्द्र संवत्सर प्रभव हुञ्छ, २ भए विभव हुञ्छ। एसै गरि अरु पनि जान्न पर्छ। श्रौत-स्मार्त-धर्मकृत्यका सङ्कल्पमा चान्द्र संवत्सरको नै उल्लेख गर्ने हो, बार्हस्पत्य संवत्सरको त फलित-ज्योतिषिहरुले वर्षफल बताउन उपयोग गर्ने हो। **यो कुरा हेमाद्रिले पनि लेखेका छन्। धर्मकृत्यका सङ्कल्पमा चान्द्र संवत्सरको नै उल्लेख गर्ने हो भन्ने वैदिक परम्पराको कुरा धर्मसिन्धुका प्रारम्भमा नै पनि छ।**

३. अयननिर्णय— मूल वैदिक परम्परामा श्रौतस्मार्त धर्मकृत्यमा अयनमा पनि **सौरअयनसापेक्ष चान्द्र अयन** नै लिइञ्छ, शुद्ध सौर अयन लिइँदैन। वैदिक वर्षारम्भका दिनमा (**तपश्शुक्लप्रतिपदामा, वैदिक आर्तव माघ-शुक्लप्रतिपदामा**) नै वैदिक सौर-चान्द्र उदगयनको र **वैदिक नभश्शुक्ल-प्रतिपदामा (वैदिक आर्तव श्रावण-शुक्लप्रतिपदामा)** वैदिक सौर-चान्द्र दक्षिणायनको आरम्भ हुञ्छ।

४. ऋतुनिर्णय— श्रौत-स्मार्त धर्मकृत्यमा ऋतु पनि मुख्य रूपमा चान्द्र नै लिइन्छ। यो कुरा निर्णयसिन्धु-धर्मसिन्धुमै पनि प्रारम्भमै छ। वैदिक नववर्षारम्भका दिनमा नै वैदिक चान्द्र **शिशिर** ऋतुको प्रारम्भ हुन्छ। अनि क्रमशः दुइदुइ चान्द्र मैनाका शुक्लप्रतिपदाहरुमा वैदिक **वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त** ऋतुहरु क्रमैले आउँछन्। मलमास पर्दा मलमासलाइ गएका दुइ मैनामा मिलाएर तिन मैनाहरुको एक ऋतु मानिन्छ। एस सम्बन्धमा वाराणसीको सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयको अनुसन्धानपत्रिका सारस्वती सुषमामा (५१वर्ष, १-४ अङ्क, २०५३ वै.) प्रकाशित **"जैमिनीयधर्ममीमांसाशास्त्रनिर्णीतानां वैदिककृत्यकालानां चान्द्रमाननियतत्वम्"** भन्ने प्रमोदवर्धन कौण्डिन्न्यायनको निबन्ध (लेख) पनि द्रष्टव्य छ।

५. मासनिर्णय— वैदिक नववर्षारम्भका दिनमा नै **तपोमास**को (चल्तिका पात्राको हैन, **वैदिक आर्तव माघमास**को) पनि प्रारम्भ हुन्छ। अनि क्रमैले शुक्लप्रतिपदाहरुमा वैदिक **तपस्य-मास** (वैदिक आर्तव फाल्गुनमास), **मधुमास** (वैदिक आर्तव चैत्रमास), **माधवमास** (वैदिक आर्तव वैशाखमास), **शुक्रमास** (वैदिक आर्तव ज्येष्ठमास), **शुचिमास** (वैदिक आर्तव आषाढमास), **नभो-मास** (वैदिक आर्तव श्रावणमास), **नभस्यमास** (वैदिक आर्तव भाद्रपदमास), **इषमास** (वैदिक आर्तव आश्विनमास), **ऊर्जमास** (वैदिक आर्तव कार्तिकमास), **सहोमास** (वैदिक आर्तव मार्गमास), **सहस्यमास** (वैदिक आर्तव पौषमास) आउँछन्। वेदमन्त्रसंहितामा उल्लिखित मुख्य वैदिक चान्द्रमासहरुका नाम **तपः, तपस्य** इत्यादि हुन्। मासहरु शुक्लपक्षको प्रतिपदाबाट अर्थात् दर्शश्राद्ध हुने दिनको भोलिपल्टबाट प्रारम्भ भै अमावास्यामा पुरा हुन्छन्। अमान्त चान्द्र मास मान्ने वैदिक परम्परा काठमाण्डु-उपत्यकाका नेवारि परम्परामा ऐले पनि सुरक्षित पाँइन्छ। वेदोक्त विषयका दृष्टिले तपस्-तपस्यादि शब्दले जुनजुन काललाइ बुजाउँछन् माघ-फाल्गुन इत्यादि शब्द पनि तेसैतेसै काललाइ बुजाउन रूढ मानिन्छन्। सूर्यको एक राशिबाट आर्का राशिमा सरेदेखि गनिने अवैदिक सौरमासका नाम त **मकरमास, कुम्भमास, मीनमास, मेषमास, वृषमास, मिथुनमास, कर्कटमास, सिंहमास, कन्यामास, तुलामास, वृश्चिकमास, धनुर्मास** हुन्। ति अवैदिक मासलाइ माघ, फाल्गुन, चैत्र, वैशाख इत्यादि भन्नु अवैदिक वा अशास्त्रीय कुरा हो।

६. अधिकमासनिर्णय— कृष्णपक्षमा नवमी पनि नागेर दशमी-एकादशीहरुमा सूर्य दृक्-सिद्ध आर्को अयनमा जान्छन् भने त्यो अमान्त चान्द्रमास अधिकमास (मलमास) हुन्छ। वैदिक चान्द्र उदगयनका (उत्तरायणका) वा दक्षिणायनका अन्तमा अयनको सातौँ अमान्त चान्द्रमासका रूपमा **वैदिक अधिकमास** पर्छ। उदगयनका अन्तमा परेको अधिकमास **द्वितीय शुचिमास (द्वितीय आषाढमास)** भनिन्छ र दक्षिणायनका अन्तमा परेको अधिकमास **द्वितीय सहस्यमास (द्वितीय पौषमास)** भनिन्छ। द्वितीय शुचिमास (द्वितीय आषाढ) ग्रीष्मऋतुअन्तर्गत हुन्छ र द्वितीय सहस्य-मास (द्वितीय पौष) हेमन्त-ऋतुअन्तर्गत हुन्छ। अधिकमासलाई सप्तम ऋतु मान्ने पनि पक्ष छ। नेपालका इतिहासमा लिच्छविकालमा र मल्लकालका पूर्वभागमा पनि वैदिक कालगणनापद्धतिको प्रभाव रहेको पाइन्छ। तेस वेलाका अभिलेखहरुमा प्रथम आषाढको र द्वितीय आषाढको तथा प्रथम पौषको र द्वितीय पौषको उल्लेख पाँइन्छ, अरु मैनामा अधिकमास परेको उल्लेखै पाइँदैन। वैदिक धर्ममा अनादि अनपभ्रष्ट परम्पराबाट आएका कुरा मात्र मान्य हुने हुँदा अयनलाइ आधार नमानि राशिपरक सौर महिनालाइ आधार मानेर बनाइएको **"असङ्क्रान्तिमासोऽधिमासः स्फुटं स्यात्"** (सिद्धान्तशिरोमणि, ग्रहगणिताध्याय, मध्यमाधिकार, अधिमासादिनिर्णयप्रकरण, पद्य ६) इत्यादि अधिकमासको परिभाषा र गणना मान्य हुँदैन।

७. क्षयमासविचार— वैदिककालगणनासिद्धान्तअनुसार **क्षयमास हुँदैन।** वैदिक अयन-र-नक्षत्रपद्धतिमा आधृत कालगणनामा क्षयमास मान्ने आवश्यकता र औचित्य पनि हुँदैन। **अतः वि.सं. २०८५ मार्गमा पर्ने भनिएको क्षयमास शुद्ध महिना नै हुन्छ** (द्र.- एहि **तिथिपत्र**, पृ.४७, ८१)।

८. पक्षनिर्णय— वैदिक परम्परामा अगिल्लै दिनमा कृष्णपक्षको समाप्ति हुनाले वा तेसै दिनमा पिण्डपितृयज्ञकालरूप अपराह्णको प्रारम्भ हुनुभन्दा अगि नै दृक्सिद्ध गणितबाट कृष्ण-

पक्षको समाप्ति हुनाले दर्शेष्टि परेको दिनबाट शुक्लपक्षको र पूर्णमासेष्टि परेको दिनबाट कृष्ण-पक्षको प्रारम्भ हुञ्छ। **वैदिक चान्द्रमाससमा पैलेइ शुक्लपक्ष अनि कृष्णपक्ष आउँछ।** चल्तिका पात्राका चान्द्र मासमाझैँ पैलेइ कृष्णपक्ष र अनि शुक्लपक्ष आँउँदैन।

९. तिथिनिर्णय– वैदिक तिथि अहोरात्रात्मक हुञ्छ। दर्शेष्टिका दिन शुक्लप्रतिपदा र पूर्णमासेष्टिका दिन कृष्णप्रतिपदा मानिञ्छ। प्रतिपदाको भोलिपल्ट द्वितीया, द्वितीयाको भोलिपल्ट तृतीया हुञ्छ। एसरि टुट्बड् नभै तिथि आउँछन्। एउटा दर्शश्राद्धदिनदेखि गन्दा ३१औँ दिनमा आर्को दर्शश्राद्धदिन परे कुनै पनि तिथि टुट्तैन। एउटा दर्शश्राद्धदिनदेखि गन्दा ३०औँ दिनमा दृक्सिद्ध पक्षसमाप्तिकालका विचारबाट आर्को दर्शश्राद्धदिन परेमा भने शुक्लपक्षको कुनै पनि तिथि टुट्बड् नमानिइकन शुक्लपक्षका तिथि सरासर नै आएका मानिञ्छन् तापनि कृष्णपक्षका अरु तिथि सरासर आएर चतुर्दशी तिथि भने टुटेको मानिञ्छ अथवा चतुर्दशी र औँसि एकैदिन परेको मानिञ्छ, तेसै दिन अपराह्णमा अमावास्यामा गरिने पिण्डपितृयज्ञ गरिञ्छ। **सबै तिथिमा घडिपलाको गणित हुने र जुन पक्षको जुन तिथि पनि टुट्न-बढ्न सक्ने *भौतिक तिथिगणनापद्धति* श्रौत-स्मार्त धर्मकर्ममा काम लाग्दैन।** आधुनिक अनुसन्धानबाट भौतिक तिथिमा अझ बडि घटबढ हुने तथ्य अगाडि आएको छ र त्यो पनि धर्मकर्ममा भने काम लाग्दैन। **सर्खारि पञ्चाङ्गनिर्णायकसमितिले स्वीकृत गरेका पञ्चाङ्गहरुका सूर्यसिद्धान्तानुसारि भनिएका तिथि-नक्षत्रका घडिपला आधुनिक दृक्सिद्धपञ्चाङ्गका तिथि-नक्षत्रका घडि-पलासित मेल नखाएका देखिञ्छन्। अतः ति वैदिकसिद्धान्तअनुसारका पनि नभएका र भौतिक वैज्ञानिक दृष्टिले पनि यथार्थ नदेखिएका कुरामा सबै श्रद्धालु वैदिकजनको विवेकपूर्ण ध्यान जान उचित छ। प्रस्तुत वैदिकतिथिपत्रमा दृक्सिद्धगणनाअनुसारको लौकिक तिथिको समाप्तिकाल दिइएको छ।**

विशेष– माथिका सबै निर्णयहरु **वेदमन्त्रसंहिता**, **ब्राह्मणग्रन्थ** तथा लगधप्रोक्त मूल **वेदाङ्ग-ज्योतिषग्रन्थका** र तिनका अनुकूल अन्य **स्मृति-पुराणवचन**हरुका आधारमा गरिएका हुन्।

(छ) प्रस्तुत वैदिक-तिथिपत्रको परिचय

यो तिथिपत्र मात्र मूल वैदिक कालगणनापद्धतिअनुसारको हुनाले वैदिक हो, ऐले प्रचलनमा रहेका नेपाल-भारतका अरु तिथिपत्र (पञ्चाङ्ग)मा वैदिक काल-गणना-पद्धति-अनुसारका विषयहरु समावेश नभएकाले ति वैदिक हैनन्।

एस वैदिक-तिथिपत्रका मुख्यभागका पृष्ठहरुमा शिरका **पैला पङ्क्तिमा** एस पत्रको नाम, **कलिसंवत्**, द्वादशयुगात्मक युगसङ्घभित्रको वर्तमान **युग**को नाम, कोष्ठभित्र कलियुगमा चलिरहेको युगसङ्घको सङ्ख्या र तेसभित्रको चलिरहेको पञ्चवर्षात्मक युगको सङ्ख्या, तेस युगको **वर्तमान वैदिक वर्ष**को नाम, कोष्ठमा तेसको सङ्ख्या, कोष्ठभित्र चान्द्र ६० वर्षमध्येको **वर्तमान चान्द्रसंवत्सर**को नाम र सङ्ख्या, वर्तमान **अयन** (उदगयन वा दक्षिणायन), **ऋतु**, **मास** र **पक्ष** क्रमशः उल्लिखित गरिएका छन्। प्रस्तुत पक्ष लाग्नुभन्दा अगि बितेको **गतकलिसावनाऽहर्गण** पनि टिप्पणीमा दिइएको छ।

तिथिपत्रका मुख्यभागका पृष्ठहरुमा शिरका **दोस्रा पङ्क्तिमा** विक्रमसंवत्, शकान्तसंवत् (शकसंवत्), बार्हस्पत्य संवत्सरको नाम, कोष्ठमा बार्हस्पत्य षष्टिसंवत्सरमध्ये वर्तमान बार्हस्पत्य-संवत्सरको सङ्ख्या, सम्बद्ध पक्षमा परेको वर्तमान कालमा अवैदिक कालगणना अँगाल्ने अरु-हरुले मान्ने गरेका गते गनिने सौर-मासको संस्कृतनाम, कोष्ठभित्र तेस मासका नेपालिका वर्तमान लोकव्यवहारमा प्रचलित नेपालि नाम, तेस पृष्ठमा उल्लिखित पक्षमा परेको मेष-वृषादि राशिलाइ लिएर अर्वाचीन कालमा परिभाषित गरिएको पूर्णिमान्त चान्द्र मैनाका पक्षका नाम, कोष्ठमा नेपाल-संवत् र विशेषतः काठमाण्डु उपत्यकाका नेवारि परम्परामा आइरहेको कृष्णान्त चान्द्रमासका पक्ष-विशेषको नेवारि नाम र तेसको संस्कृत अनुवाद तथा आर्को कोष्ठभित्र अङ्ग्रेजि मैनाको नाम र वर्ष (क्रैस्ताब्द) क्रमैले दिइएका छन्।

इ दोस्रा पङ्क्तिका उल्लेख वैदिक तिथिपत्रको संवत् अयन, ऋतु, मास तथा पक्ष चल्तिको अवैदिक पञ्चाङ्गमा कुन संवत्, अयन, ऋतु, मास तथा पक्ष मानिएका छन् भनि

सूचित गर्न र दुइथरि पात्राको तुलनात्मक ज्ञान दिन गरिएको हो। वैदिक मूल परम्पराका अनुयायिले एस उल्लेखको उपेक्षा गरिदिने हो।

तिथिपत्रका मुख्य भागका पृष्ठहरुमा पृष्ठका देउरेपट्टिको पैलो ठाडो पङ्क्तिमा वैदिक कालगणनापद्धतिअनुसारका श्रौत-स्मार्त धर्मकर्ममा अँगालिने प्रतिपदा-द्वितीयादि **तिथि**हरु (वै.ति.) छन्। दोस्रो ठाडो पङ्क्तिमा तेसतेस दिनका सूर्योदयदेखि सूर्यास्तसम्म रहने करणहरु दिय्येका छन्। तेसतेस दिनका सूर्यास्तदेखि आर्को सूर्योदय नभइञ्जेल रातभर रहने करण चाहिँ दिनको करणभन्दा पछिल्लो करण हुञ्छ भन्ने जान्न पर्छ। शुक्लपक्षका रातका करणहरूका नाम र कृष्णपक्षका रातका करणहरूका नाम करणचक्रमा छुट्टै दिय्येका छन्। तेसपछिको ठाडो पङ्क्तिमा श्रौत-स्मार्त धर्मकर्ममा नअँगालिने **दृक्सिद्ध गणनाका लौकिक तिथि**हरु (लौ.ति.) दिय्येका छन्। तेसपछि लौकिक तिथिको समाप्ति हुने काल तेस दिनको घण्टा मिनेटमा दिइएको छ। **त्याँहाँ २४ भन्दा माथिका अङ्क भए तेस दिनको रातका १२ बजेपछिको १ घण्टाको समयलाइ २५ घण्टा (बजे) दुइ घण्टाको समयलाइ २६ घण्टा (बजे) इत्यादि भनिएको भन्ने जान्न पर्छ।** लौकिक तिथिका घण्टा-मिनेटको ठाडो पङ्क्तिभन्दा पछिल्लो ठाडो पङ्क्तिमा **वेदाङ्गज्योतिषोक्त नक्षत्रनाम** (वे.न.) दिइएका छन्। तेसपछिको ठाडो पङ्क्तिमा **वेदाङ्गज्योतिषको गणितअनुसारको नक्षत्रकालको समाप्तिको मुहूर्त र कला** दिइएको छ। तेसपछिको ठाडो पङ्क्तिमा **दृक्सिद्ध नक्षत्र** (दृक्.न.) र तेसपछिको ठाडो पङ्क्तिमा उल्लिखित नक्षत्रको समाप्तिकालको **दृक्सिद्ध गणनाअनुसार घण्टा-मिनेट** (बजे) दिइएको छ। तेसपछिको ठाडो पङ्क्तिमा विष्कम्भादि स्थिर २७ योगहरु र तेसपछिको ठाडो पङ्क्तिमा तेसतेस योगको समाप्तिकाल घण्टा-मिनेटमा दिइएको छ। विष्कम्भादि २७ स्थिर योगहरु— **विष्कम्भः, प्रीतिः, आयुष्मान्, सौभाग्यः, शोभनः, अतिगण्डः, सुकर्मा, धृतिः, शूलम्, गण्डः, वृद्धिः, ध्रुवः, व्याघातः, हर्षणः, वज्रम्, सिद्धिः, व्यतीपातः, वरीयान्, परिघः, शिवः, सिद्धिः, साध्यः, शुभः, शुक्लः, ब्रह्मा, ऐन्द्रः, वैधृतिः** इ हुन्। त्यसभन्दा पछिको ठाडो पङ्क्तिमा वारविशेषका र नक्षत्रविशेषका योगले हुने कार्यविशेषमा विशेष विचार गरिने आनन्दादि २८ चर योगहरु दिय्येका छन्। तिनको उल्लिखित लौकिक नक्षत्रको समाप्तिकालमा समाप्ति मान्ने गरिञ्छ। आनन्दादि योग— **आनन्दः, कालदण्डः, धूम्रः (धूम्राक्षः), धाता (प्रजापतिः), सौम्यः, ध्वाङ्क्षः, केतुः (ध्वजः), श्रीवत्सः, वज्रम्, मुद्गरः, छत्रम्, मित्रम्, मानसम्, पद्मम्, लुम्बः, उत्पातः, मृत्युः, काणः, सिद्धिः, अर्थः, शुभः, मुसलम्, गदः, मातङ्गः, राक्षसः (रक्षः), चरः, स्थिरः, वर्धमानः** इ २८ हुन्। आनन्दादियोगको ठाडो पङ्क्तिभन्दा पछिको ठाडो पङ्क्तिमा तेस दिन चन्द्रमा रहने लौकिक नक्षत्रअनुसारका वेदमा नभएका मेष-वृष इत्यादि राशिहरु दिय्येका छन्; कुनै दिनमा तिनको उल्लेख नगरिकन घण्टामिनेटको उल्लेख गरिएको छ भने तेस दिन तेति घण्टा-मिनेटसम्म माथिल्लो कोष्ठमा उल्लिखित राशिमा र तेति घण्टा-मिनेटपछि तल्लो कोष्ठमा उल्लिखित राशिमा चन्द्रमा रहने भन्ने बुज्न पर्छ। तेसपछिको ठाडो पङ्क्तिमा **दिनमान**का घण्टा-मिनेटहरु, तेसपछि **सूर्योदय**को समय (बजे) र तेसपछि **सूर्यास्त**को समय (बजे) दिय्येका छन्। तेसपछि **वैदिक आर्तव (सायन) सौर वर्षको सावनाऽहर्गण** दिइएको छ। वैदिक सौर-चान्द्र नववर्ष लागिसक्ता पनि अगिल्लो दृक्सिद्ध आर्तव (सायन) वैदिक सौर वर्ष बितिसकेको छैन भने तेसैको अहर्गण दिएर त्यो बितिसकेपछि **नवीन दृक्सिद्ध आर्तव (सायन) वैदिक सौर वर्षको अहर्गण** दिइएको छ। तेसपछिको ठाडो पङ्क्तिमा वैदिक मूल ग्रन्थमा नभएका तर आजभोलि लोकमा अत्यन्त प्रसिद्ध **वार**हरु दिय्येका छन्। तेसपछिका ठाडो पङ्क्तिमा वेदमा नभएका अर्वाचीन सूर्यसिद्धान्तअनुसारका राशिमूलक परिभाषाका गत १९६० संवत्देखि राणाशासक चन्द्रसम्सेरले शासकीय व्यवहारमा अनिवार्य गरिएका **मेषमास-वृषमास इत्यादि (वैशाख-जेठ इत्यादि)** सौरमासका **गते**हरु दिय्येका छन्। तेसपछिका ठाडा पङ्क्तिमा क्रिश्चियन (इसाइ) वर्षका जनबरि-फरबरि इत्यादि मैनाका **परराष्ट्र-व्यवहारमा उपयोगि तारिख**हरु दिइएका छन्। तेसपछिका खण्डमा तेसतेस दिनका मुख्य श्रौत, स्मार्त, पौराण इत्यादि व्रतपर्वहरु उल्लिखित छन्। सम्बद्ध तिथिका पङ्क्तिमा व्रतपर्वादिको सबै विवरण नअटाएमा बाँकि विवरण बुट्टा चिह्न दिएर खालि भएका आर्का पङ्क्तिमा दिइएको छ। त्याँहाँ पनि नअटाएमा फेरि आर्को चिह्न दिएर आर्को ठाममा विवरण दिइएको छ। **वास्तवमा पुराणले बताएका वार्षिक व्रत-पर्वहरु पनि वैदिक चान्द्र तपोमास,**

तपस्यमास इत्यादिमा नै मनाउनु समुचित हो तापनि ऐलेलाइ पौराण व्रतपर्वहरु नवीन परिभाषाका माघ-फाल्गुनादि चान्द्रमासमा लेखिएका छन्। **धेरैजसो चाडपर्व धेरैजसो वर्षमा ऋतुअनुसार एक महिना अगाडि सार्नु पर्ने देखिएको छ। एस पात्रामा प्रमुख चाडपर्व ऋतुअनुसार अगाडि सारेर पनि देखाइएका छन्। जनैपूर्णिमा पर्व चाहिँ धेरैजसो वर्ष दुइ महिना र कुनैकुनै वर्ष एक महिना अगाडि सार्नु पर्ने देखिएको छ र एस पात्रामा अगाडि सारेर नै देखाइएको छ।** तिथिपत्रका मुख्य भागका पृष्ठहरुमा तल्लो भागमा गतकलिसावनाऽहर्गण (वर्तमान कलियुग लागेदेखि अहिलेसम्म बितेका जम्माजम्मि दिनहरुको सङ्ख्या) दिइएको छ। अवशिष्ट स्थानमा केइ ज्ञातव्य विषय दिय्येका छन्। ग्रहस्थितिसारणी र ग्रहकुण्डली पनि इनै पृष्ठहरुमा राखिएका छन्।

श्रौति वैदिक भन्नाले श्रौत अग्निको आधान गरेका द्विजहरु बुजिञ्छन्। **स्मार्त वैदिक** भन्नाले गृह्य अग्निको आधान गरेका द्विज बुजिञ्छन्। **उपवसथ**=इष्टिको अगिल्लो दिन, व्रतग्रहण गर्ने दिन, **पूर्णमासेष्टि**=श्रौत अग्निको आधान गरेका ब्राह्मणले पूर्णिमाका र प्रतिपदाका सन्धिमा गर्ने इष्टि, **दर्शेष्टि**=तेस्तै व्यक्तिले अमावास्याका र प्रतिपदाका सन्धिमा गर्ने इष्टि, **वैश्वदेवपर्व**=श्रौत अग्निको आधान गरेका द्विजले गर्ने चातुर्मास्ययज्ञका चार पर्वमध्येको पैलो पर्व, **वरुणप्रघास**= चातुर्मास्ययज्ञका चार पर्वमध्येको दोस्रो पर्व, **साकमेध**=चातुर्मास्ययज्ञका चार पर्वमध्येको तेस्रो पर्व, **शुनासीरीय**=चातुर्मास्ययज्ञका चार पर्वमध्येको चौथो पर्व, **निरूढपशुबन्ध**= श्रौत अग्निको आधान गरेका चातुर्मास्य याग गरिसकेका समर्थ व्यक्तिले गर्ने स्वतन्त्र पशुयाग। इ र एस्ता वैदिक कर्मको वेदमन्त्रसंहिता-ब्राह्मणग्रन्थ-श्रौतसूत्र-गृह्यसूत्र-परिशिष्टका आधारमा दिइएको परिचय स्वाद्ध्यायशालाका **वैदिक धर्म मूल रूपमा** (प्र.सं. २०४५, द्वि.सं. २०६२, तृ.सं. २०८०) भन्ने, **वैदिक हिन्दु धर्म-संस्कृति** (२०६५)भन्ने, **कतिपयवैदिकयज्ञपरिचयः** (२०६७) भन्ने र **वैदिक यज्ञिय उपकरण र वृक्षहरु** (२०७२) भन्ने पुस्तकहरुमा पाँउन सकिञ्छ। इ ग्रन्थमा दिइएको प्रामाणिक परिचयको अध्ययनबाट श्रौत-स्मार्तयज्ञका विषयमा अरुले दिएका विवरणमा रहेका गडबडिका सम्बन्धमा पनि विवेक गर्न सकिञ्छ।

एस तिथिपत्रमा लोकमा प्रचलित व्यवहारका लागि लोकले खोजि गर्ने कतिपय आवश्यक मुख्य कुराहरु **अनुबन्ध**मा जोडिएका छन्।

(ज) प्रस्तुत वैदिक तिथिपत्रको प्रकाशनको आवश्यकता

